# MT

2017 .... .... 1100

Seat No. | | | | | | | |

**MT - SANSKRIT COMPOSITE (SECOND OR THIRD LANGUAGE) - SEMI PRELIM - I**
**PAPER - VI**

**Time : 2 Hours** **(Pages 6)** **Marks : 40**

## प्रथमः विभागः - गद्यम् ।

**प्र.१ अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

(i) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत । १

काश्चन ........... अर्जुनं प्रति एवागच्छतः स दृष्टवान् ।

(वनचरान् / निशाचरान् / गुप्तचरान्)

(ii) कः कं वदति ? १

किं करणीयमधुना ?

(iii) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत । १

अर्जुनः प्राणिनः प्रति कृतघ्नतां प्रकटितवान् ।

दीर्घसमयोऽतीतः । अज्ञातवासकाले शस्त्रहीनः परिव्राजकवेषधारी अर्जुनः पुनरेकवारं तमेव वनप्रदेशं प्राविशत् । निबिडारण्ये पर्यटति तस्मिन् कुतश्चित् मनुजशब्द इव श्रुतिपथमागतः। कांश्चन गुप्तचरान् तं प्रति एवागच्छतः सः दृष्टवान् । सः व्यचिन्तयत्, ''अज्ञातवासकाले यदि कोऽपि मामभिजानीयात् तर्हि महापत्तिः उद्भवेत् । किं करणीयमधुना ।'' इति चिन्तयतः तस्य पुरतः सूर्यखगः तत्रोपस्थितः । तेन स्वरवेण मार्गं निर्दिश्यार्जुनः कस्यापि विशालवृक्षस्य समीपं नीतः । वृक्षे महान् कोटरः आसीत् । कोटरं प्रविश्य अर्जुनः तत्रैव निभृतः स्थितः । तस्मिन् कोटरे स्थिते पिपीलिकाभिस्तस्य सर्वाङ्गं तथा आच्छादितं यथा अदृश्यः इवाभवत् । अर्जुनमन्विष्यन्तः तत्रागताः ते गुप्तचराः तं ज्ञातुमसमर्थाः ततः प्रतिनिवृत्ताः । एवं सङ्कटमुक्तोऽर्जुनः सूर्यखगस्य पिपीलिकानां च वचनं स्मारं स्मारं तान् प्रति कृतज्ञतां प्रकटितवान् ।

**२. स्वमतप्रकटनम् ।** २

मानवेन कदापि गर्वः न करणीयः इति विषये माध्यमभाषया लिखत ।

**प्र.१ ब) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

(i) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत । १

........... अङ्कः भाग्यदर्शकः, यतः एषः .......... दर्शयति ।

(पञ्च / सप्त) (स्वामित्वं / दारिद्र्यं)

(ii) पूर्णवाक्येन उत्तरत । १
नूतनानि सप्ताश्चर्याणि विश्वतः कैः निर्वाचितानि ?

(iii) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत । १
गिझापिरॅमिडरचना सप्ताश्चर्येषु चतुर्थम् आश्चर्यम् ।

विश्वे तथा सर्वधर्मेषु सप्ताङ्कः विशेषतामादधाति । अङ्कः एष भाग्यदर्शकः स्वामित्वद्योतकः च । यथा सप्तस्वराः सप्तदिनानि तथैव सप्ताश्चर्याणि जगति विशेषरूपेण ख्यातानि । सप्तशून्यशून्यद्वितमे ख्रिस्ताब्दे (२००७) नूतनानि विश्वसप्ताश्चर्याणि उद्घोषितानि यानि शताधिककोटिरसिकजनैः विश्वतः निर्वाचितानि । प्रथमाश्चर्यं रोमनगरभूषणं कोलोसिअम् - फेव्हिन - अम्फीथिएटरम् एतद् अर्धवर्तुलाकारं प्रेक्षागृहं सम्राट्-व्हेस्पॅशियनमहोदयेन निर्मितम्। द्वितीयमाश्चर्यं नाम चीनदेशस्थिता मृत्पाषाणेष्टिकामयी विशाला भित्तिः । उत्तरकाष्ठास्थितशत्रोः रक्षणार्थं शिंगहाउन-टी-नृपेण निर्मितैषा । त्वं जानास्येव । यद् मिस्रदेशः पिरॅमिडरचनार्थं जगति विख्यातः । एतासु पिरॅमिडरचनासु गिझापिरॅमिडरचना सप्ताश्चर्येषु एकतमा । एतदभिमानास्पदं यद् चतुर्थाश्चर्यं भारतभूमावेव स्थितम् । शाहजहानसम्राजा स्वपत्नीस्मरणार्थं विनिर्मितमेतत् शिल्पं भारतीयस्थापत्यकलायाः अनुपमेयं प्रतीकम् । पौर्णिमायां रात्रौ चन्द्रज्योत्स्नाधवलितस्यैतस्य ताजमहालस्य शोभा अवर्णनीया केवलं स्वसंवेद्या च ।

२. **पृथक्करणम् ।** २

| नाम | क्रमाङ्कः | देशः | निर्माता | विशेषः |
|---|---|---|---|---|
| ☐ | प्रथमम् आश्चर्यम् | ☐ | सम्राट् व्हेस्पॅशियन-महोदयः | ☐ |
| विशाला भित्तिः | द्वितीयम् आश्चर्यम् | चीन | ☐ | मृत्पाषाणेष्टिकामयी |

**प्र.१ क) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

१. **शब्दज्ञानम् । (केऽपि २ कृती कुरुत ।)**

(i) समूहेतरपदं लिखत । १

१) सूर्यकिरणः, मयूखः, रश्मिः, मेघः - ........।

२) अहर्निशम्, प्रभाते, दिवारात्रम्, अहोरात्रम् - ........।

(ii) गद्यांशात् विशेषणे चित्वा लिखत । १
............ , ..................यात्री ।

(iii) गद्यांशे आगते द्वे पूर्वकालवाचक-धातुसाधित-अव्यये लिखत । १

अन्येद्युः साशङ्कमनाः स गङ्गातीरं गत्वा गङ्गानदीं पृष्टवान्, हे गङ्गादेवि, अहर्निशं जनानां पापक्षालनं करोषि । तेन भवत्याः जलं निश्चितं पापमयं वर्तते । तर्हि भवती अस्य पापमयजलस्य किं करोतीति? तन्निशम्य गङ्गा उक्तवती, रे यात्रिन् यदाऽहं सागरं मिलामि तदा सर्वमेतत्पापमयं जलं तस्मिन्नेव उत्सृजामि । अनन्तरं तस्य किं भवतीति न जानेऽहमिति। तदा तद् ज्ञातुमुत्सुकोऽसौ यात्री सागरतीरं गतवान् तत्र च सागरं पृष्टवान्, रे सागर, सर्वाः नद्यः स्वजलस्थितं पापं त्वयि निक्षिपन्ति । तेन त्वं पापाकरः वा पापधिरेव भवसि न वेति। सागर उक्तवान्, न हि, यदा नद्यः पापमानयन्ति तदहं गृह्णामीति सत्यम् । किन्तु सूर्यकिरणैः तस्य जलस्य बाष्पं भवति । बाष्पीभूतस्य पापजलस्य तदनन्तरं किं भवतीति न जाने इति । तच्छ्रुत्वा अतीवोत्कण्ठितः स सागरतीरे स्थित्वैव अवलोकयितुमारब्धवान् । तेन दृष्टं तस्य बाष्पस्यैव मेघो भवति । अतः स यात्री मेघं पृष्टवान्, रे मेघ, अस्य पापस्य किं करोषीति ?

२. **पृथक्करणम् ।**

यथाक्रमं घटनाः लिखत । २

(i) नदी सागरे पापजलम् उत्सृजति ।

(ii) बाष्पस्य मेघं भवति ।

(iii) मानवाः नद्यां पापं क्षालयन्ति ।

(iv) सागरजलस्य बाष्पं भवति ।

## द्वितीयः विभागः - पद्यम् ।

**प्र.२ अ) पद्यांशान् पठित्वा निर्दिष्टे कृती कुरुत ।**

समीपमाराधनमन्दिरं च सेन्ट्-चेपलं विश्रुतमस्ति नाम ।
मूर्ध्नोऽस्य तीक्ष्णस्तनुरग्रभागो नभस्थितं दर्शयतीव देवम् ।।१।।
विख्यातनाम्नी खलु जोनदेवी सुमार्गमध्येऽस्ति तदीयमूर्तिः ।
अश्वाधिरूढा स्वकरे गृहीत्वा ध्वजं समुत्तोल्य विराजते सा ।।२।।
यस्यामनेका खलु सेतुबन्धैः विराजते सीनसरित्सुबद्धा ।
नदीं पुरी सापि नदी पुरीञ्च परस्परं भूषयतोऽत्र मन्ये ।।३।।

१. **पृथक्करणम् ।** २

**विशेषणानि लिखित्वा जालचित्रं पूरयत ।**



२. **शब्दज्ञानम् ।**

पर्यायपदानां मेलनं कुरुत । १

| ‘अ’ | ‘ब’ |
|---|---|
| (१) तटम् | अ) तटिनी |
| (२) सरित् | ब) नगरी |
| (३) ध्वजः | क) कूलम् |
| (४) पुरी | ड) केतनः |

**प्र.२ ब) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

यामममध्ये न भोक्तव्यं याममयुग्मं न लङ्घयेत् ।
याममध्ये रसोत्पत्तिर्यामयुग्माद्बलक्षयः ॥१॥
गुणी गुणं वेत्ति न वेत्ति निर्गुणः
बली बलं वेत्ति न वेत्ति निर्बलः ।
पिको वसन्तस्य गुणं, न वायसः
गजश्च सिंहस्य बलं न मूषकः ॥२॥

१. **अवबोधनम् ।**

पूर्णवाक्येन उत्तरत । १

किं न लङ्घयेत् ?

२. **तात्पर्यलेखनम् ।** २

द्वितीयश्लोकस्य तात्पर्यं माध्यमभाषया लिखत ।

**प्र.२ क) स्मरणम् । (केवलं १ श्लोकः लेखनीयः ।)** २

**सुभाषितं शुद्धं पूर्णं च लिखत ।**

(i) धर्मार्थकाम०....... च ॥

(ii) अद्रोहः .......०प्रशस्यते ॥

**प्र.२ ड) श्लोकांशान् मेलयत ।** २

| | |
|---|---|
| (i) तृणात्सञ्जायते क्षीरं | १) शीलमेतत्प्रशस्यते । |
| (ii) दन्तशोधनचूर्णेन | २) धृतमन्यैर्न धारयेत् । |
| (iii) अनुग्रहश्च दानं च | ३) क्षीरात्सञ्जायते विषम् । |
| (iv) उपानहौ च वासश्च | ४) दन्तमांसान्यबाधयन् । |
| | ५) याममध्ये रसोत्पत्तिः। |

## तृतीयः विभागः - व्याकरणम् ।

**प्र.३ यथानिर्देशं कृतीः कुरुत । (केवलं ५ उपप्रश्नाः लेखनीयाः ।)** २

**अ) नाम/सर्वनामपदानां पृथक्करणम् । (केऽपि ४ पर्यायाः लेखनीयाः ।)**

| | प्रथमा एकवचन | द्वितीया बहुवचन | तृतीया एकवचन |
|---|---|---|---|
| नाम | | | |
| सर्वनाम | | | |

(वः, गृहिणा, यशः, अयम्, सर्वया, द्रुमान्)

**आ) क्रियापदानां पृथक्करणम् । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

| द्वितीयः भविष्यकालः | परोक्षः भूतकालः | प्रथमः भूतकालः | विध्यर्थः | वर्तमानकालः | आज्ञार्थः |
|---|---|---|---|---|---|
| | | | | | |

(घर्षयेत्, दर्शयति, प्रारेभे, प्रार्थयन्त, पश्य, पास्यति)

**इ) समासाः । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

| | **विग्रहवाक्यानि** | **समासनामानि** |
|---|---|---|
| (i) | अवैधः आचारः । | नञ् - तत्पुरुषः |
| (ii) | सङ्घे सङ्घे । | बहुव्रीहिः |
| (iii) | मूलं च शाखाः च, तान् । | कर्मधारयः |
| (iv) | न समर्थः । | उपपद - तत्पुरुषः |
| (v) | गुप्तं चरन्ति इति । | इतरेतर - द्वन्द्वः |
| (vi) | महान् अर्घः येषां ते । | अव्ययीभावः |

**ई) उपपदविभक्तिः ।** २

**उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत । (केऽपि ४ पर्यायाः लेखनीयाः ।)**

(i) ....... प्रति महाराजः द्वौ युवानौ प्रेषितवान् । ( तं / तस्मै / तस्य )

(ii) उचितं ....... विना पापान्मुक्तिरशक्या । ( प्रायश्चित्तं / प्रायश्चित्तस्य / प्रायश्चित्ते )

(iii) ....... परितः क्रीडाङ्गणं वर्तते । ( शाला / शालां / शालायाः )

(iv) ....... दूरं मातुलगृहम् अस्ति । (नगरे / नगरस्य / नगरात्)

(v) ....... साकं जनकः ग्रामः गच्छति । (पुत्रम् / पुत्रेण / पुत्रेन)

(vi) ....... समीपे कोलाहलः न कर्तव्यः । (रुग्णालयम् / रुग्णालयस्य / रुग्णालये)

**उ) सन्धिं / सन्धिविग्रहं कुरुत । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

| | | | | |
|---|---|---|---|---|
| (i) एतन्निशम्य | = | एतत् | + | ....... । |
| (ii) ....... | = | वाक् | + | ईशः । |
| (iii) चिन्तयच्च | = | ....... | + | च । |
| (iv) ....... | = | द्योतकः | + | च । |
| (v) सुमार्गमध्येऽस्ति | = | ....... | + | अस्ति । |
| (vi) जानास्येव | = | जानासि | + | ....... । |

**ऊ) सङ्ख्यावाचकविशेषणानि । रिक्तस्थानपूर्तिः । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

(i) ......... दिने एव महाराजः युवानौ प्रेषितवान् । (second)
(ii) अस्यां क्रीडायां प्रतिसङ्घं ......... क्रीडापटवः भवन्ति । (12)
(iii) भगवद्गीतायाः ......... अध्यायाः सन्ति । (18)
(iv) देवक्याः ......... अपत्यानि कंसेन हिंसितानि । (7)
(v) सप्ताहस्य ......... अहं वाचनालयं गच्छामि । (thrice)
(vi) अहं ......... अपि ग्रामं न गच्छामि । (once)

## चतुर्थः विभागः - लेखनकौशल्यम् ।

**प्र.४ अधोनिर्दिष्टे कृती कुरुत ।**

**अ) वाक्यनिर्माणम् ।**

**कोष्ठकतः शब्दान् चित्वा अर्थसङ्गतानि ४ वाक्यानि लिखत ।** ४

| | | |
|---|---|---|
| ग्रन्थपालः | सांस्कृतिककार्यक्रमे | कुशलः। |
| नर्तकः | वृत्तपत्रवाचने | मग्नः। |
| अध्यापकः | पुस्तकवितरणे | तत्परः। |
| कर्मचारी | सहायकार्ये | रतः। |

**आ) परिच्छेदपूर्तिः ।** ४

**मञ्जूषातः उचितान् शब्दान् चित्वा ४ रिक्तस्थानानि पूरयित्वा परिच्छेदं पुनर्लिखत ।**

सन्तशिरोमणिना रामदासस्वामिना एकं वैश्विकसत्यं कथितम्। अस्मिन् ........ न कोऽपि सर्वसुखी विद्यते। पूर्वसञ्चितानुसारम् अस्मिन् जन्मनि सुखदुःखानि भोक्तव्यानि। सर्वे जनाः सुखं कामयन्ते। किन्तु दुःखस्यानन्तरं सुखम् आगच्छति। तदा ........ विषण्णीभूत्वा किमर्थं दुःखं द्विगुणीकर्तव्यम् ? वास्तवं जीवनं ........ कल्पनाविश्वे मनुजः रममाणः भवति। यदि तस्य मनः प्रशिक्षितं भवेत् तर्हि स जीवने ........ निर्मातुं शक्नोति। 'मनाचे श्लोक' नाम स्वामिमहोदयस्य मराठीभाषायां लिखितः ग्रन्थः नाम मनसः प्रशिक्षणस्य शास्त्रशुद्धा प्रक्रिया।

(आनन्दं, दुःखेन, जगति, त्यक्त्वा)

**Best of Luck**